# महाजनो येन गतः स पन्थाः

**महाकवीनां काव्येषु सुभाषितानाम् अपूर्वः कोषः भवति। यथा विविध-वर्णपुष्पाणां शोभया विभूषितम् उपवनं लोकानां चित्तं बलाद् आकर्षति तथा सत्कवीनां काव्येभ्यः सङ्कलितानि पद्यरत्नानि सहृदयानां पाठकानां मनांसि रञ्जयन्ति।**
**अस्मिन् पाठे पुण्यभूमेः भारतस्य वन्दना, विद्यायाः उपयोगिता, समयस्य महिमा, परोपकारस्य गरिमा, सांसारिकानां पदार्थानाम् असारता, सज्जनदुर्जनानां प्रकृतिविभेदः, धर्मस्य गहनता, महापुरुषाणां मार्गानुसरणस्य श्रेष्ठता च प्रतिपादिता अस्ति।**

www.dreamtopper.in

1. ***गायन्ति देवाः किल गीतकानि***
***धन्यास्तु ते भारतभूमिभागे।***
***स्वर्गापवर्गास्पदमार्गभूते***
***भवन्ति भूयः पुरुषाः सुरत्वात्॥***

***अन्वयः***- देवाः किल गीतकानि गायन्ति। ते पुरुषाः तु धन्याः (ये) स्वर्गापवर्गास्पदमार्गभूते भारतभूमिभागे सुरत्वात् भूयः भवन्ति।

2. ***विद्या समुन्नतिपथं विशदीकरोति***
***बुद्धिं विचारविषये प्रखरीकरोति।***
***कर्तव्यपालनपरां धियमादधाति***
***विद्या सखा परमबन्धुरथेह लोके॥***

***अन्वयः***- विद्या समुन्नतिपथम् विशदीकरोति, विचारविषये बुद्धिम् प्रखरीकरोति, कर्तव्यपालनपराम् धियम् आदधाति, इह लोके विद्या सखा अथ परमः बन्धुः।

3. ***नष्टं द्रव्यं प्राप्यते ह्युद्यमेन***
***नष्टा विद्या प्राप्यतेऽभ्यासयुक्त्या ।***

***नष्टारोग्यं सूपचारैः सुसाध्यं***
***नष्टा वेला या गता सा गतैव ॥***

***अन्वयः-*** नष्टम् द्रव्यम् हि उद्यमेन प्राप्यते, नष्टा विद्या अभ्यासयुक्त्या प्राप्यते । नष्टारोग्यम् सूपचारैः सुसाध्यम्, या नष्टा वेला गता सा गता एव ।।

4. ***पद्मकरं दिनकरो विकचीकरोति***
***चन्द्रो विकासयति कैरवचक्रवालम् ।***

***नाभ्यर्थितो जलधरोऽपि जलं ददाति***
***सन्तः स्वयं परहितेषु कृताभियोगाः ॥***

***अन्वयः-*** दिनकरः नाभ्यर्थितः (सन् अपि) पद्माकरम् विकचीकरोति, चन्द्रः कैरवचक्रवालम् विकासयति, जलधरः नाभ्यर्थितः अपि जलम् ददाति, सन्तः स्वयम् परहितेषु कृताभियोगाः (भवन्ति) ।

5. ***भोगा न भुक्ताः वयमेव भुक्ताः***
***तपो न तप्तं वयमेव तप्ताः ।***

***कालो न यातो वयमेव याताः***
***तृष्णा न जीर्णा वयमेव जीर्णाः ॥***

***अन्वयः-*** भोगाः न भुक्ताः वयम् एव भुक्ताः, तपः न तप्तम् वयम् एव तप्ताः । कालः न यातः वयम् एव याताः, तृष्णा न जीर्णा वयम् एव जीर्णाः ।

6. ***कटु क्वणन्तो मलदायकाः खलाः***
***तुदन्त्यलं बन्धनशृङ्खला इव ।***

***मनस्तु साधुध्वनिभिः पदे पदे***
***हरन्ति सन्तो मणिनूपुरा इव ॥***

***अन्वयः-*** कटु क्वणन्तः मलदायकाः खलाः बन्धनशृङ्खला इव अलम् तुदन्ति । सन्तः मणिनूपुराः इव साधुध्वनिभिः पदे पदे मनः हरन्ति ।

www.dreamtopper.in

7. ***तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः***
***नैको मुनिर्यस्य मतं प्रमाणम् ।***

***धर्मस्य तत्त्वं निहितं गुहायाम्***
***महाजनो येन गतः स पन्थाः ॥***

***अन्वयः***– तर्कः अप्रतिष्ठः श्रुतयः विभिन्नाः एकः मुनिः न यस्य मतम् प्रमाणम् । धर्मस्य तत्त्वम् गुहायाम् निहितम्, येन महाजनः गतः सः पन्थाः ।

## अनुप्रयोगः

**1. अधोलिखितान् शब्दान् उच्चैः पठत, सञ्चिकायां च लिखत –**

क. तर्कोऽप्रतिष्ठः, प्राप्यतेऽभ्यासयुक्त्या, जलधरोऽपि
ख. अभ्यर्थितः, ह्युद्यमेन, परमबन्धुरथेह

**2. 'अ' स्तम्भस्य श्लोकांशाः 'ब' स्तम्भस्य श्लोकांशैः सह संयोज्यन्ताम् –**

| | अ | ब |
|---|---|---|
| क. | गायन्ति देवाः किल गीतकानि | नष्टा वेला या गता सा गतैव । |
| ख. | विद्या समुन्नतिपथं विशदीकरोति | महाजनो येन गतः स पन्थाः । |
| ग. | नष्टारोग्यं सूपचारैः सुसाध्यं | सन्तः स्वयं परहितेषु कृताभियोगाः । |
| घ. | कटु क्वणन्तो मलदायकाः खलाः | बुद्धिं विचारविषये प्रखरीकरोति । |
| ङ. | नाभ्यर्थितो जलधरोऽपि जलं ददाति | तृष्णा न जीर्णा वयमेव जीर्णा । |
| च. | धर्मस्य तत्त्वं निहितं गुहायां | तुदन्त्यलं बन्धनशृङ्खला इव । |
| छ. | कालो न यातो वयमेव याताः | धन्यास्तु ते भारतभूमिभागे । |

**3. अधोलिखितेषु पदेषु सन्धिं सन्धिच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत –**

क. .................................. प्राप्यते + अभ्यासयुक्त्या
ख. जलधरोऽपि ............... + ...................
ग. .................................. धन्याः + तु

www.dreamtopper.in

| | | |
|---|---|---|
| घ. | तर्कोऽप्रतिष्ठः | ............... + ................... |
| ङ | .................................. | परमबन्धुः + अथ + इह |
| च. | नैकोमुनिर्यस्य | ....... + ....... + ....... + ....... |
| छ. | ................................. | तुदन्ति + अलम् |
| ज. | मनस्तु | ............... + .................... |

## 4. पाठात् विचित्य समस्तपदानि रचयत –

| | *विग्रहः* | *समस्तपदम्* | *समासनाम* |
|---|---|---|---|
| क. | भारतभूमेः भागः | ................................. | षष्ठीतत्पुरुषः |
| ख. | दिनं करोति इति | ................................. | उपपदतत्पुरुषः |
| ग. | साधुभिः ध्वनिभिः | ................................. | कर्मधारयः |
| घ. | महान् जनः | ................................. | कर्मधारयः |
| ङ | कर्तव्यस्य पालने परां ताम् | ................................. | सप्तमीतत्पुरुषः |
| च. | बन्धनाय शृङ्खला | ................................. | चतुर्थीतत्पुरुषः |
| छ. | मणिजटिताः नूपुराः | ................................. | मध्यमपदलोपी तत्पुरुषः |
| ज. | परेषां हितेषु | ................................. | षष्ठीतत्पुरुषः |

## 5. अधोलिखितानां वाक्यानां कर्तृवाच्ये परिवर्तनं कुर्वन्तु –

| | *कर्मवाच्ये* | *कर्तृवाच्ये* |
|---|---|---|
| | *यथा–देवैः गीतकानि गीयन्ते।* | *देवाः गीतकानि गायन्ति।* |
| क. | विद्यया समुन्नतिपथः विशदीक्रियते। | ................................................ |
| ख. | दिनकरेण पद्माकरः विकचीक्रियते। | ................................................ |
| ग. | चन्द्रेण कैरवचक्रवालः विकास्यते। | ................................................ |
| घ. | जलधरेण जलं दीयते। | ................................................ |



www.dreamtopper.in

ङ	मलदायकैः खलैः सज्जनाः तुद्यन्ते ।	...............................................

च.	सद्भिः मनः ह्रियते ।	...............................................

## 6.( अ )पाठात् उपयुक्तानि पदानि चित्वा अधोलिखिततालिकायां रिक्तस्थानानि पूरयन्तु –

| | *विशेषणपदानि* | *विशेष्यपदानि* |
|---|---|---|
| क. | नष्टम् | ............................ |
| ख. | ............................ | भोगाः |
| ग. | याताः | ............................ |
| घ. | ............................ | तृष्णा |
| ङ | मलदायकाः | ............................ |
| च. | ............................ | श्रुतयः |
| छ. | नष्टा | ............................ |
| ज. | ............................ | तपः |

www.dreamtopper.in

## 6.( ब )विलोमपदानि पाठात् चित्वा लिखत –

| | *पदानि* | *विलोमपदानि* |
|---|---|---|
| क. | दानवाः | ............................ |
| ख. | अधर्मः | ............................ |
| ग. | नरकम् | ............................ |
| घ. | मधुरम् | ............................ |
| ङ | दुर्जनः | ............................ |
| च. | अकर्तव्यम् | ............................ |

**7. प्रश्नान् उत्तरत –**

क. धर्मस्य तत्त्वं कुत्र निहितम् अस्ति ?

ख. का जीर्णा न भवति ?

ग. सज्जनाः कथं मनः हरन्ति ?

घ. कः स्वयम् एव जलं ददाति ?

ङ. नष्टारोग्यं कैः सुसाध्यं भवति ?

च. विद्या किं करोति ?

**8. अधोलिखिताः सूक्तीः पठित्वा समभावसूक्तयः पाठात् विचित्य तत्समक्षं लिखत –**

क. दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम् ।

.....................................................................................................................................

ख. गतः कालः कृते प्रयत्नेऽपि पुनः न आयाति ।

.....................................................................................................................................

ग. अयाचितः अपि मेघः जलं ददाति ।

.....................................................................................................................................

घ. सः तु भवति दरिद्रः यस्य तृष्णा विशाला ।

.....................................................................................................................................

ङ विद्या बन्धुः विदेशगमने ।

.....................................................................................................................................

च. परोपकाराय सतां विभूतयः ।

.....................................................................................................................................

www.dreamtopper.in

## 9. अन्वयं पूरयत –

क. देवाः किल .................................. गायन्ति। ते पुरुषाः तु .............................. (ये) स्वर्गापवर्गास्पदमार्गभूते ............................. सुरत्वात् भूयः भवन्ति।

ख. तर्कः ........................ श्रुतयः विभिन्नाः, एकः मुनिः न यस्य .................... प्रमाणम्। धर्मस्य तत्त्वं गुहायां ................, येन महाजनः गतः स पन्थाः।

ग. विद्या समुन्नतिपथं ...................... करोति विचारविषये ............... प्रखरीकरोति, कर्तव्यपालनपरां धियम् आदधाति, इह लोके ................ सखा अथ परमः बन्धुः।

## 10. पाठगतश्लोकानां भावस्पष्टीकरणम् उचितपदैः कुर्वन्तु –

क. संसारे ...................................... अपि सन्ति दुर्जना अपि। तयोः व्यवहारे महान् भेदः। ......................... कटु भाषन्ते कुव्यवहारं च कुर्वन्ति। ते ...................... इव मानवं पीडयन्ति किन्तु सज्जनाः मणिनूपुराः इव भवन्ति। ते ................... वदन्ति प्रियं च कुर्वन्ति।

ख. .................. इयं प्रकृतिः भवति यत् ते स्वयम् एव परेषां हितम् आचरन्ति। सूर्यः स्वयमेव .................... विकासयति। ............ स्वकिरणैः कुमुदानां विकासं करोति। मेघाः स्वयमेव .............. कृत्वा लोकस्य उपकारं कुर्वन्ति।

ग. जीवनकालः स्वल्पः किन्तु .......................... अनन्ताः। ते अस्मिन् स्वल्पकाले भोक्तुं न शक्यन्ते। तपः अपि ............... न शक्यते। आयुषः अन्तः भवति न तु कालस्य। वयं ............... भवामः किन्तु तृष्णा सदा तरुणी तिष्ठति। एतद् ....................... मानवजीवनस्य सत्यम्।

www.dreamtopper.in

# पाठविकासः

## क. पाठे सङ्कलितानां सुभाषितानां सन्दर्भाः

| *श्लोकसङ्ख्या* | *सन्दर्भग्रन्थाः* |
|---|---|
| 1. | विष्णुपुराणम् |
| 2. | वैद्यकीयसुभाषिताम् |

3. नीतिशतकम्

4. वैराग्यशतकम्

5. कादम्बरीमुखम्

6. महाभारतम्

## ख. समानान्तरसूक्तयः

- विद्या मित्रं प्रवासेषु। *(चाणक्यनीतिः 5/15)*
- लोभेन बुद्धिश्चलति, लोभो जनयते तृषाम्
  तृषार्तो दुःखमाप्नोति, परत्रेह न मानवः ।। *(हितोपदेशः मित्रलाभः /140)*
- स तु भवति दरिद्रो यस्य तृष्णा विशाला
  मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ।। *(वैराग्यशतकम् /45)*
- व्यर्थः कालातिपातो न, कर्तव्यश्चतुरैर्नरैः
  गतः कालः प्रयत्नेऽपि, पुनर्नायाति कर्हिचित् ।।

## 'च्वि' प्रत्ययः

'च्वि' प्रत्ययः अभूततद्भावार्थकः। यद् वस्तु पूर्वं यस्मिन् रूपे न आसीत्, किन्तु सम्प्रति तत् परिवर्तितं रूपं धारयति, एतस्य बोधनाय 'च्वि' प्रत्ययः प्रयुज्यते।

एषः प्रत्ययः 'कृ-भू-अस्' धातूनाम् एव योगे भवति। प्रक्रियायां प्रत्ययः लुप्तः भवति। पूर्वपदस्य अन्तिमः अकारः आकारः वा ईकाररूपं धारयति। पूर्वपदस्य अन्ते यदि स्वराः भवन्ति ते दीर्घाः जायन्ते।

### *उदाहरणानि*

अकृष्णः कृष्णः क्रियते = कृष्णीक्रियते

(कृष्ण + च्वि + क्रियते = कृष्ण + ई + क्रियते)

अविशदं विशदं करोति = विशदीकरोति

अप्रखरं प्रखरं करोति = प्रखरीकरोति

अविकचं विकचं करोति = विकचीकरोति

www.dreamtopper.in